न नयेद्गजसाह्वयम्” इति च भा० उ० प० ७७अ० ।

**आपच्चिक** त्रि० आपदं चिक्कति क्लन्नति चिक्क–अण् पृ० कलोपः । आपत्कर्त्तके । गौरा० स्त्रियां ङीष् ।

**आपटव** न० न सन्ति पटवोऽस्य तस्य भावः अण् । पटुत्वशून्यत्वे । न पटुरपटुरिति तत्पुरुषात्तु ष्यञि उत्तरपदस्यैव वृद्धिः । अपाटवम् । “अपाटवाद्यशौचाद्यैर्यदि विघ्नं प्रजायते” स्मृतिः ।

**आपण** पु० आपणायन्ते विक्रीणन्त्यत्र आ+पण-नि० आधारे घ । १हट्टे, २क्रयविक्रेयद्रव्यशालायाञ्च । “शकटापणवेशाश्च बणिजोवन्दिनस्तथा । नराश्च मृगयाशीलाः शतशोऽथ सहस्रशः” भा० व० प० २३८ । “भक्ष्यमाल्यापणानाञ्च ददृशुः श्रियमुत्तमाम्” भा० स० प० ४अ० । “अस्वामिना तु यद्भुक्तं गृहक्षेत्रापणादिकम् । सुहृद्बन्धुसकुल्यस्य न तद्भोगेन हीयते” दा० त० वृ० “आपणः पण्यवीथिका” रघु० व्या० त० “आपणो विक्रयस्थानम्” तेनैवोक्तम् । “पूर्णापणाविपणिनो विपणीर्विभेजुः” माघः । भावे घञ् आपाणः । क्रयविक्रयव्यवहारे पु० ।

**आपणिक** त्रि० आपणादायस्थानादागतः ठक् । १हट्टस्थानादागते राजकरादौ । आपणस्य धर्म्यम् ठक् । २हट्टस्थवणिग्धर्म्ये । आपणस्यावक्रयः राज्यग्राह्यः ठक् । ३हट्टस्य राजग्राह्ये द्रव्ये (तोला) आ+पण–इकन् । ४बणिग्जने उज्ज्वलदत्त ।

**आपतन** न० आ+पत–भावे ल्युट् । १आगमने २प्राप्तौ ३ज्ञाने “क्वचित् प्राकरणिकादर्थादप्राकरणिकार्थस्यापतनम्” सा० द० दैववशात् ४पतने च ।

**आपति** पु० आपतति आ+पत–इन् । सततगामिनि वायौ “आपतये त्वा परिपतये गृह्णामि” य० ५,५, आपतिः सततगतिर्वायुः” वेददी० । [२दैवायत्ते त्रि० उज्ज्वलदत्तः ।

**आपतिक** पु० आपतति शीघ्रम् आ+पत–इकन् । १श्येने

**आपतित** त्रि० आ+पत-क्त । १हठादागते २दैवायत्तपतने च

**आपत्कल्प** पु० आपद्युचितः कल्पोविधिः शा० त० । आपत्कालिकविधौ स च विधिर्गौतमेनोक्तः यथा “आपत्कल्पोब्राह्मणस्याब्राह्मणाद्विद्योपयोगोऽनुगमनं शुश्रूषाऽऽसमाप्तेर्ब्राह्मणोगुरुः याजनाध्यापनप्रतिग्रहाः सर्व्वेषां पूर्व्वः पूर्व्वोगुरुस्तदलाभे क्षत्रवृत्तिस्तदलाभे वैश्यवृत्तिः तस्यापण्यं गन्धरसकृतान्नतिलशाणक्षौमाजिनानि रक्तनिर्णिक्ते वाससी क्षीरञ्च सविकारं मूलफलपुष्पौषधमधुमांसतृणोदकापथ्यानि पशवश्च हिंसासंयोगे पुरुषवशाकुमारीवेहतश्च नित्यं भूमिव्रीहियवाजाव्यश्व ऋषभधेन्वनडूहश्चैके । विनिमयस्तु रसानां रसैः पशूनाञ्च न लवणकृतान्नयोः, तिलानाञ्च समेनामेन तु पक्कस्य संप्रत्यर्थे सर्व्वथातुवृत्तिरशक्तावशूद्रेण तदप्येके प्राणसंशये, तद्वर्णसङ्करोऽभक्ष्यनियमस्तु प्राणसंशये ब्राह्मणोऽपि शस्त्रमाददीत राजन्यवैश्यकर्म्म, राजन्यो वैश्यकर्म्म”

**आपत्काल** पु० आपद्युक्तः कालः शा० त० । आपद्युक्ते समये “अब्राह्मणादध्ययनमापत्काले विधीयते” मनुः “आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि । मनस्तापेन शुध्येत्तु द्रुपदां वा शतं जपेत्” प्रा० त० स्मृ० ।

**आपत्कालिक** त्रि० आपत्काले भवः काश्या० ठञ् ञिठ् वा । आपत्कालभवे ठञि स्त्रियां ङीष् ञिठि तु टाबिति भेदः ।

**आपत्ति** स्त्री आ+पद–क्तिन् । आपदि आपच्च रोगाद्यभिभूततावस्था सम्यग्वर्त्तनोपायानुपलम्भश्च । आपदि धर्माचरणञ्च या० स्मृ० दर्शितम् यथा

“क्षात्रेण कर्म्मणा जीवेद्विशां वाप्यापदि द्विजः । निस्तीर्य्य तामथात्मानं पावयित्वा न्यसेत् पथि । फलोपलक्षौमसोममनुष्यापूपवीरुधः । तिलौदनरसक्षारान् दधि क्षीरं घृतं जलम् । शस्त्रासवमधूच्छिष्टमधुलाक्षाश्च वर्हिषः । मृच्चर्म्म पुष्पकुतपकेशतक्रविषक्षितीः । कौशेयनीललवणमांसैकशफसीसकान् । शाकार्द्रौषधिपिण्याकपशुगन्धांस्तथैव च । वैश्यवृत्त्यापि जीवन्नो विक्रीणीत कदाचन । धर्म्मार्थं विक्रयं नेयास्तिला धान्येन तत्समाः । लाक्षालवणमांसानि पतनीयानि विक्रये । पयोदधि च मद्यञ्च हीनवर्णकराणि च । आपद्गतः सम्प्रगृह्णन् भुञ्जानो वा यतस्ततः । न लिप्येतैनसा विप्रोज्वलनार्कसमो हि सः । कृषिः शिल्पं भृतिर्विद्या कुसीदं शकटं गिरिः । सेवाऽनूपं नृपोभैक्षमापत्तौ जीवनानि तु । बुभुक्षितस्त्र्यहं स्थित्वा धान्यमब्राह्मणाद्धरेत् । प्रतिगृह्य तदाख्येयमभियुक्तेन धर्मतः । तस्य वृत्तं कुलं शीलं श्रुतमध्ययनं तपः । ज्ञात्वा राजा कुटुम्बञ्च धर्म्यां वृत्तिं प्रकल्पयेत्” । विस्तरस्तु भा० शा० प० आपद्धर्म्म पर्व्वणि दृश्यः । २प्राप्तौ । “स्थानापत्तेर्द्रव्येषु धर्मलाभः” कात्या० ४,२,१८ “इतरेतरभावापत्तिः” शा० भा० व्यतिरेकव्याप्त्या ३अर्थादेः सिद्धौ । अर्थापत्तिः ४अनिष्टप्रसङ्गे स च व्याप्यस्याहार्य्यारोपात् व्यापकस्याहार्य्यरोपः । यदि निर्वह्निः स्यात् निर्धूमः स्यादित्येवं रूपः ।

**आपत्य** पु० अपत्याधिकारे विहितः अण् । पाणिन्यादिभिः